# चतुर्थः पाठः

*'अभिज्ञानशाकुन्तलम्' न केवलं महाकविकालिदासस्य एव अपितु संस्कृतसाहित्यस्यापि सर्वश्रेष्ठा रचना अस्ति। यथा च केनापि कविना कथितम्–*

***'काव्येषु नाटकं रम्यं, तत्र रम्या शकुन्तला।'***

*प्रस्तुतनाट्यांशः शाकुन्तलस्य सप्तमाङ्कात् उद्धृतः सम्पादितांश अस्ति। दानवैः सह कृते युद्धे इन्द्रस्य विजयानन्तरं इन्द्रपुरी-अमरावतीतः प्रत्यागच्छन् राजा दुष्यन्तः मार्गे महर्षिमारीचस्य आश्रमे विश्रामं करोति। तत्र बालकस्य सर्वदमनस्य सिंहशिशुक्रीडां व्यवहारचञ्चलतां च दृष्ट्वा तस्य मनसि बालकं प्रति स्वाभाविकम् आकर्षणम् उत्पन्नं भवति। शनैः शनैः, वार्तालाप प्रसंगेन तस्य विश्वासः भवति यत् सर्वदमनः तस्य पुत्र एव। इत्थं कविना अस्मिन् दृश्ये बालकस्य चापल्यं दुष्यन्तस्य च वात्सल्यम् अतीव मनमोहकतया वर्णितम् अस्ति।*

## जृम्भस्व सिंह! दन्तांस्ते गणयिष्ये

(नेपथ्ये)

मा खलु चापलं कुरु। कथं गत एवात्मनः प्रकृतिम्?

**राजा** – (कर्णं दत्वा) अभूमिः इयम् अविनयस्य। को नु खल्वेषः निषिध्यते? (शब्दानुसारेण अवलोक्य) (सविस्मयम्) अये, को नु खलु अयम् अनुबध्यमानः तपस्विनीभ्याम् अबालसत्त्वो बालः?

**अर्धपीतस्तनं मातुरामर्दक्लिष्टकेसरम्।**
**प्रक्रीडितुं सिंहशिशुं बलात्कारेण कर्षति।।**

(ततः प्रविशति यथानिर्दिष्टकर्मा तपस्विनीभ्यां सह बालः)

**बालः** – जृम्भस्व सिंह! दन्तांस्ते गणयिष्ये।

**प्रथमा** – अविनीत, किं नोऽपत्यनिर्विशेषाणि सत्त्वानि विप्रकरोषि? हन्त, वर्धते ते संरम्भः। स्थाने खलु ऋषिजनेन सर्वदमन इति कृतनामधेयोऽसि।

**द्वितीया** – एषा खलु केसरिणी त्वां लङ्घयिष्यति यदि तस्याः पुत्रकं न मुञ्चसि।

**बालः** – (सस्मितम्) अहो, बलीयः खलु भीतोऽस्मि! (इत्यधरं दर्शयति)

**प्रथमा** – वत्स एनं बालमृगेन्द्रं मुञ्च। अपरं ते क्रीडनकं दास्यामि।

**बालः** – कुत्र? देह्येतत्। (इति हस्तं प्रसारयति)

**द्वितीया** - सुव्रते, न शक्य एष वाचामात्रेण विरमयितुम्। गच्छ त्वम् मदीये उटजे मार्कण्डेयस्य ऋषिकुमारस्य वर्णचित्रितो मृत्तिकामयूरस्तिष्ठति, तमस्योपहर।

**प्रथमा** - तथा। (इति निष्क्रान्ता)

**बालः** - अनेनैव तावत् क्रीडयिष्यामि। (इति तापसीं विलोक्य हसति)

**तापसी** - भवतु, न मामयं गणयति। (पार्श्वमवलोक्य) कोऽत्र ऋषिकुमाराणाम्? (राजानमवलोक्य) भद्रमुख, एहि तावत्! मोचयानेन डिम्भलीलया बाध्यमानं बालमृगेन्द्रम्!

**राजा** - उपगम्य। (सस्मितम्) अयि भो महर्षिपुत्र!

**तापसी** - भद्रमुख! न खल्वयमृषिकुमारः।

**राजा** - आकारसदृशं चेष्टितमेवास्य कथयति। स्थान-प्रत्ययात्तु वयमेवंतर्किणः।
(इति यथाभ्यर्थितमनुतिष्ठति)

**राजा** - (बालकमुपलालयन्) न चेन्मुनिकुमारोऽयम्, अथ कोऽस्य व्यपदेशः?

**तापसी** - पुरुवंशः।

**राजा** - (आत्मगतम्) कथमेकान्वयो मम? (प्रकाशम्) न पुनरात्मगत्या मानुषाणामेष विषयः।

**तापसी** - यथा भद्रमुखो भणति। अप्सरःसंबन्धेनास्य जनन्यत्र देवगुरोस्तपोवने प्रसूता।

**राजा** - (अपवार्य) हन्त, द्वितीयमिदमाशाजननम्। (प्रकाशम्) अथ सा तत्रभवती किमाख्यस्य राजर्षेः पत्नी?

**तापसी** - कस्तस्य धर्मदारपरित्यागिनो नाम संकीर्तयितुं चिन्तयिष्यति?

**राजा** - (स्वगतम्) इयं खलु कथा मामेव लक्ष्यीकरोति। यदि तावदस्य शिशोर्मातरं नामतः पृच्छामि? अथवा अनार्यः परदारव्यवहारः।
(प्रविश्य मृण्मयूरहस्ता)

**तापसी** - सर्वदमन, शकुन्तलावण्यं प्रेक्षस्व!

**बालः** - (सदृष्टिक्षेपम्) कुत्र वा मम माता?

**उभे** - नाम सादृश्येन वञ्चितो मातृवत्सलः।

**द्वितीया** - वत्स, अस्य मृत्तिकामयूरस्य रम्यत्वं पश्येति भणितोऽसि।

**राजा** - (आत्मगतम्) किं वा शकुन्तलेत्यस्य मातुराख्या। सन्ति पुनर्नामधेयसादृश्यानि।

**बालः** - मातः! रोचते मे एष भद्रमयूरः। (इति क्रीडनकमादत्ते)

**प्रथमा** - (विलोक्य, सोद्वेगम्) अहो, रक्षाकरण्डकमस्य मणिबन्धे न दृश्यते।

**राजा** - अलमावेगेन। नन्विदमस्य सिंहशावकविमर्दात् परिभ्रष्टम्। (इत्यादातुमिच्छति)

**उभे** - मा खल्वेतदवलम्ब्य! कथं? गृहीतमनेन? (इति विस्मयाद् परस्परमवलोकयतः।)

**राजा** - किमर्थं प्रतिषिद्धाः स्मः?

**प्रथमा** - शृणोतु महाराजः! एषाऽपराजिता नामौषधिरस्य जातकर्मसमये भगवता मारीचेन दत्ता। एतां किल मातापितरावात्मानं च वर्जयित्वाऽपरो भूमिपतितां न गृह्णाति।

**राजा** – अथ गृह्णाति?

**प्रथमा** – ततस्तं सर्पो भूत्वा दशति।

**राजा** – भवतीभ्यां कदाचिदस्याः प्रत्यक्षीकृता विक्रिया?

**उभे** – अनेकशः।

**राजा** – (सहर्षम् आत्मगतम्) कथमिव सम्पूर्णमपि मे मनोरथं नाभिनन्दामि? (इति बालं परिष्वजते।)

**बालः** – मुञ्च माम्। यावन्मातुः सकाशं गमिष्यामि।

**राजा** – पुत्रक, मया सहैव मातरमभिनन्द्रिष्यसि।

**बालः** – मम खलु तातो दुष्यन्तः। न त्वम्।

**राजा** – (सस्मितम्) एष विवाद एव प्रत्याययति।

## पदच्छेदः

**अभूमिरियमविनयस्य**–अभूमिः+इयम्+अविनयस्य, **मातुरामर्दक्लिष्टकेसरम्**– मातुः+आमर्द+क्लिष्ट+ केसरम्, **नोऽपत्यनिर्विशेषाणि**– नः+अपत्य+निर्विशेषाणि, **मृत्तिकामयूरस्तिष्ठति**– मृत्तिका+मयूरः+तिष्ठति, **तमस्योपहर**– तम्+अस्य+उपहर, **मामयं**– माम्+अयम्, **पार्श्वमवलोक्य**– पार्श्वम्+अवलोक्य, **खल्वयमृषिकुमारः**– खलु+अयम्+ऋषिकुमारः, **चेष्टितमेवास्य**– चेष्टितम्+एव+अस्य, **प्रत्ययात्तु**– प्रत्ययात्+तु, **यथाभ्यर्थितमनुतिष्ठति**– यथा+अभ्यर्थितम्+अनुतिष्ठति, **चेन्मुनिकुमारोऽयम्**– चेत्+मुनिकुमारः+अयम्, **कथमेकान्वयो**– कथम्+एक+अन्वयः, **अप्सरःसम्बन्धेनास्य**– अप्सरः+सम्बन्धेन+अस्य, **द्वितीयमिदमाशाजननम्**– द्वितीयम्+इदम्+आशाजननम्, **किमाख्यस्य**– किम्+आख्यस्य, **शकुन्तलेत्यस्य**– शकुन्तला+इति+अस्य, **क्रीडनकमादत्ते**– क्रीडनकम्+आदत्ते, **अलमावेगेन**– अलम्+आवेगेन, **नन्विदमस्य**– ननु+इदम्+अस्य, **इत्यादातुमिच्छति**– इति+आदातुम्+इच्छति, **खल्वेतदवलम्ब्य**– खलु+एतद्+अवलम्ब्य, **ततस्तं**– ततः+तम्, **कदाचिदस्याः** – कदाचिद्+अस्याः।

## सन्धि-विच्छेदः

**खल्वेषः**– खलु+एषः, **दन्तांस्ते**– दन्तान्+ते, **भीतोऽस्मि**– भीतः+अस्मि, **इत्यधरं**– इति+अधरम्, **देह्येतत्**– देहि+एतत्, **मार्कण्डेयस्यर्षिकुमारस्य**– मार्कण्डेयस्य+ऋषिकुमारस्य, **अनेनैव**– अनेन+एव, **मोचयानेन**– मोचय+अनेन, **कोऽस्य**– कः+अस्य, **जनन्यत्र**– जननी+अत्र, **देवगुरोस्तपोवने**– देवगुरोः+तपोवने, **कस्तस्य**– कः+तस्य, **पश्येति**– पश्य+इति, **मातुराख्या**– मातुः+आख्या, **नामौषधिरस्य**– नाम+औषधिः+अस्य, **मातापितरावात्मानम्**– मातापितरौ+आत्मानम्, **सहैव**– सह+एव।

## समासः

**अर्धपीतस्तनम्**– अर्धम् असम्पूर्णं पीतः स्तनः येन स, तम्, **आमर्दक्लिष्टकेसरम्**– आमर्देन बलाद् आकर्षणजनितावेगेन क्लिष्टा इतस्ततः विक्षिप्ताः केसराः स्कन्धबालाः यस्य तम्, **सिंहशिशुं**– सिंहस्य

शिशुः तम्।

## कठिन-शब्दार्थाः

**मा** — न। **चापलम्** — चञ्चलताम्। **प्रकृतिम्** — स्वभावम्। **अभूमिः**- अनुचितं स्थानम्। **अविनयस्य** — चञ्चलतायाः। **निषिध्यते** — निवार्यते। **अवलोक्य** — दृष्ट्वा, **सविस्मयम्** — आश्चर्येण सह। **अनुबध्यमानः** — अनुसरणं कृत्वा अवरुध्यमानः। **अबालसत्वः** — असाधारण-शक्तिसम्पन्नः। **अर्धपीतस्तनम्** — येन स्वमातुः दुग्धम् अर्धम् एव पीतम्। **आमर्दक्लिष्टकेसरम्** — आकर्षणेन अस्तव्यस्त-केशम्। **बलात्कारेण** — बलपूर्वकम्। **कर्षति** — आकर्षति/खींचता है। **यथानिर्दिष्टकर्मा** — पूर्वोक्त-कार्य-संलग्नः। **अविनीत** — विनयरहित। **नः** — अस्माकम्। **अपत्यनिर्विशेषाणि** — सन्तानतुल्यानि। **सत्वानि** — प्राणिनः, **विप्रकरोषि**— तुदसि (परेशान कर रहे हो)। **हन्त** — ओह (अव्यय)। **संरम्भः** — क्रोधः। **स्थाने** — उचितमेव। **कृतनामधेयः** — नामयुक्तः। **केसरिणी** — सिंही। **लङ्घयिष्यति** — आक्रमणं करिष्यति। **मुञ्चसि**- त्यजसि। **बलीयः** — अत्यधिकम्। **अधरम्** — ओष्ठम्। **बालमृगेन्द्रम्** — सिंहशिशुम्। **शक्यः** — समर्थः। **वाचामात्रेण** — वाणीमात्रेण। **मदीये** — मम। **उटजे** — कुटीरे। **उपहर** — आनय। **पार्श्वम्** — निकटम्। **एहि** — आगच्छ। **डिम्भलीलया** — बालक्रीडया। **बाध्यमानम्** — पीड्यमानम्। **चेष्टितम्** — क्रियाकलापम्। **स्थानप्रत्ययात्** — स्थानस्य विश्वासात्। **तर्किणः** - चिन्तयन्तः। **यथाभ्यर्थितम्** — यथा-इच्छितम्। **अनुतिष्ठति** — करोति। **चेत्** — यदि। **व्यपदेशः** — वंशः। **अन्वयः** — वंशः, **आत्मगत्या** — स्वेच्छया। **विषयः** — देशः, स्थानम्। **अपवार्य** — मुखम् अपसार्य। **आशाजननम्** — आशाप्रदम्। **किमाख्यस्य** — किं नाम्नः। **धर्मदारपरित्यागिनः** — धर्मपत्न्याः परित्यागिनः। **संकीर्तयितुम्** — उच्चारयितुम्। **अनार्यः** - अशिष्टाचारः, **परदारव्यवहारः** — परस्त्रीचर्चा। **शकुन्तलावण्यम्** — पक्षिणः सौन्दर्यम्। **रम्यत्वम्** — सौन्दर्यम्। **मातुराख्या** — मातुः नाम। **नामधेयसादृश्यानि** — नाम्नःसमानताः। **आदत्ते** — गृह्णाति। **रक्षाकरण्डकम्** — रक्षार्थम् अभिमन्त्रितम् औषधि-सूत्रम्। **परिभ्रष्टम्** — पतितम्। **आदातुम्** — उत्थापयितुम्। **जातकर्मसमये** — संस्कारविशेषसमये। **वर्जयित्वा** — त्यक्त्वा। **विक्रिया** — प्रतिक्रिया। **अनेकशः** — अनेकवारम्। **परिष्वजते** — आलिङ्गनं करोति। **सकाशम्** — निकटम्। **प्रत्याययति** — विश्वासमुत्पादयति।

## अभ्यास-प्रश्नाः

**वस्तुनिष्ठ-प्रश्नाः**

१. बालकः सिंहशिशोः किं गणयितुम् इच्छति —

(क) केशान् (ख) नखान्

(ग) दन्तान् (घ) पादान् ( )

२. बालकस्य किं नाम आसीत्?

(क) रिपुदमनः (ख) दुष्टदमनः

(ग) अरिदमनः (घ) सर्वदमनः ( )

३. तापसी कस्य क्रीडनकम् आनेतुं गच्छति —

(क) मारीचस्य (ख) सर्वदमनस्य

(ग) मार्कण्डेयस्य (घ) दुष्यन्तस्य

४. जातकर्मसमये क: बालकाय अपराजिता-नामौषधिं ददाति?

(क) दुष्यन्त: (ख) मारीच:

(ग) शकुन्तला (घ) मार्कण्डेय: ( )

५. तापसी केन पदार्थेन निर्मितं मयूरम् आनयति?

(क) स्वर्णनिर्मितम् (ख) ताम्रनिर्मितम्

(ग) काष्ठनिर्मितम् (घ) मृत्तिकानिर्मितम् ( )

**लघूत्तरात्मक-प्रश्ना:**

१. बालक: कस्य वंशस्य आसीत्?

२. सर्वदमनस्य मणिबन्धे किम् आबद्धम् आसीत्?

३. बालकस्य पितु: किं नाम आसीत्?

४. बालक: सर्वदमन: कस्य सकाशं गन्तुम् इच्छति?

**निबन्धात्मक-प्रश्ना:**

१. 'अनार्य: परदारव्यवहार:' इति सूक्तिं स्पष्टीकुरुत।

२. बालकस्य सर्वदमनस्य रक्षाकरण्डकस्य कीदृशी विशेषता आसीत्?

## उत्तरमाला

**वस्तुनिष्ठ-प्रश्ना:**

१. (ग) २. (घ) ३. (ग) ४. (ख) ५. (घ)

**लघूत्तरात्मक-प्रश्ना:**

१. पुरुवंशस्य २. रक्षाकरण्डकम् ३. दुष्यन्त: ४. मातु: सकाशम्।

**व्याकरणात्मक-प्रश्ना:**

१. निम्नलिखितानां पदानां सन्धिं कुरुत —

(क) खलु+अयम् ..........................

(ख) क:+अस्य ..........................

(ग) एक+अन्वय: ..........................

(घ) मृग+इन्द्रम् ..........................

(ङ) सह+एव ..........................

२. निम्नलिखितानां पदानां प्रकृति-प्रत्ययं निर्दिशत —

| **पदम्** | **प्रकृतिः** | + | **प्रत्ययः** |
|---|---|---|---|
| (क) रम्यत्वम् | .................. | + | .................. |
| (ख) केसरिणी | .................. | + | .................. |
| (ग) जनता | .................. | + | .................. |
| (घ) अपराजिता | .................. | + | .................. |

३. निम्नलिखितानां पदानां वाक्ये प्रयोगं कुरुत —

(क) बालः ..........................................

(ख) अपत्यः ..........................................

(ग) विषयः (देशः) ..........................................

(घ) सर्पः ..........................................

४. निम्नलिखितानां पदानां समासः विधेयः —

| **विग्रहः** | **समस्त पदम्** |
|---|---|
| (क) माता च पिता च | .................... |
| (ख) रामश्च कृष्णश्च | .................... |
| (ग) राजा चासौ ऋषिः च | .................... |
| (घ) उद्वेगेन सहितम् | .................... |